## द्विगौ क्रतौ। (९७/३८३१)

द्विगौ उत्तरपदे क्रतुवाचिनि समासे पूर्वपदमन्तोदात्तं भवति। गर्गत्रिरात्रः। [1]चरकत्रिरात्रः। कुसुरविन्दसप्तरात्रः। गर्गाणां त्रिरात्रः गर्गत्रिरात्रः। द्विगौ इति किम्? अतिरात्रः। अचशिचत्वादन्तोदात्तः। क्रतौ इति [2]किम्? बिल्वसप्तरात्रः। बिल्वशतस्य बिल्वहोमस्य वा सप्तरात्रः बिल्वसप्तरात्रः॥

## सभायां नपुंसके। (९८/३८३२)

[3]सभाशब्दे उत्तरपदे नपुंसकलिङ्गे समासे पूर्वपदमन्तोदात्तं भवति। गोपालसभम्। पशुपालसभम्। स्त्रीसभम्। दासीसभम्। सभायाम् इति किम्? [4]ब्राह्मणसेनम्। नपुंसकम् इति किम्? राजसभा। ब्राह्मणसभा। [5]सभायां प्रतिपदोक्तं [6]नपुंसकलिङ्गं गृह्यते इति रमणीयसभम्, ब्राह्मणकुलम् इत्यत्र न भवति॥

## पुरे प्राचाम्। (९९/३८३३)

पुरशब्दे उत्तरपदे प्राचां देशे [7]पूर्वपदमन्तोदात्तं भवति। ललाटपुरम्। [8]काञ्चीपुरम्। [9]शिवदत्तपुरम्। कार्णिपुरम्। नार्मपुरम्। प्राचाम् इति किम्? शिवपुरम्॥

## अरिष्टगौडपूर्वे च। (१००/३८३४)

अरिष्ट गौड[10] इत्येवंपूर्वे समासे पुरशब्दे उत्तरपदे पूर्वपदमन्तोदात्तं भवति। अरिष्टपुरम्। गौडपुरम्। पूर्वग्रहणं किम्? इहापि यथा स्यात्। अरिष्टश्रितपुरम्। गौडभृत्यपुरम्[11]॥

## न हास्तिनफलकमार्देयाः। (१०१/३८३५)

हास्तिन फलक मार्देय [12]इत्येतानि पूर्वपदानि पुरशब्दे उत्तरपदे [13]नान्तोदात्तानि भवन्ति। [14]'पुरे प्राचाम्' (६. २. ९९/३८३३) इति [15]प्राप्तिः प्रतिषिध्यते। हास्तिनपुरम्। [16]फलकपुरम्। मार्देयपुरम्। मृदोरपत्यं मार्देयः। 'शुभ्रादित्वात् ढक्' (४. १. १२३/११२६)॥

## कुसूलकूपकुम्भशालं बिले। (१०२/३८३६)

कुसूल कूप कुम्भ शाला इत्येतानि पूर्वपदानि बिलशब्दे उत्तरपदे अन्तोदात्तानि भवन्ति। कुसूलबिलम्। कूपबिलम्। [17]कुम्भबिलम्। शालाबिलम्। [18]कुसूलादिग्रहणं किम्? सर्पबिलम्। बिले इति किम्? कुसूलस्वामी॥

---

1. कुसुमित° ह, जनकत्रिरात्रः ब. क. 2. किम् नास्ति ह. 3. सभायां फ. 4. ब्राह्मसभम् ह. 5. सभायां नास्ति फ. 6. नपुंसकम् फ. ह. 7. पूर्वमन्तोदात्तम् फ. 8. काञ्चीपुरम् नास्ति फ. 9. शिवदपुरम् फ. 10. इत्येव इत्यधिकम् फ. 11. अप्रागर्थः आरम्भः इत्यधिकम् ह. 12. इत्येते शब्दाः पूर्वपदभूताः ह. 13. अन्तोदात्ताः ह. 14. वाक्यमिदं नास्ति फ. 15. प्राप्तः ह. 16. फलकपुरम् नास्ति फ. 17. कुम्भबिलम् नास्ति फ. 18. कुसूलात् इति किम् ह.